श्री कमलापत्यष्टकं

श्री कमलापत्यष्टकं

भुजगतल्पगतं घनसुंदरं
गरुडवाहनमंबुजलोचनं |
नळिनचक्रगदाकरमव्ययं
भजत रे मनुजाः कमलापतिं || 1 ||

अलिकुलासितकोमलकुंतलं
विमलपीतदुकूलमनोहरं |
जलधिजाश्रितवामकलेवरं
भजत रे मनुजाः कमलापतिं || 2 ||

किमु जपैश्च तपोभिरुताध्वरै-
-रपि किमुत्तमतीर्थनिषेवणैः |
किमुत शास्त्रकदंबविलोकनै-
-र्भजत रे मनुजाः कमलापतिं || 3 ||

मनुजदेहमिमं भुवि दुर्लभं
समधिगम्य सुरैरपि वांछितं |
विषयलंपटतामपहाय वै
भजत रे मनुजाः कमलापतिं || 4 ||

न वनिता न सुतो न सहोदरो
न हि पिता जननी न च बांधवाः |
व्रजति साकमनेन जनेन वै
भजत रे मनुजाः कमलापतिं || 5 ||

सकलमेव चलं सचराचरं
जगदिदं सुतरां धनयौवनं |
समवलोक्य विवेकदृशा द्रुतं
भजत रे मनुजाः कमलापतिं || 6 ||

विविधरोगयुतं क्षणभंगुरं
परवशं नवमार्गमलाकुलं |
परिनिरीक्ष्य शरीरमिदं स्वकं
भजत रे मनुजाः कमलापतिं || 7 ||

मुनिवरैरनिशं हृदि भावितं
शिवविरिंचिमहेंद्रनुतं सदा |
मरणजन्मजराभयमोचनं
भजत रे मनुजाः कमलापतिं || 8 ||

हरिपदाष्टकमेतदनुत्तमं
परमहंसजनेन समीरितं |
पठति यस्तु समाहितचेतसा
व्रजति विष्णुपदं स नरो ध्रुवं || 9 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं श्री कमलापत्यष्टकं ||